ष्येकाहन्यूनषण्मासद्वितीयसंवत्सरेषु । न च विधान-सामर्थ्यादेव तत्तत्कालप्राप्तेरनर्थकमिदमिति वाच्यम् तत्तत्कालानां द्वादशाहाद्यपेक्षया प्राधान्यबोधनार्थत्वात् अत्र "आनन्त्यात् कुलधर्माणां पुंसाञ्चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" इति व्याघ्र-वचनोक्तप्रशस्त इत्यनेन कुलाचारज्योतिःशास्त्रादिज्ञात-कर्तितमरणराष्ट्रोपप्लवादिक्लेशदेशादिगमनानुसारादेव सपिण्डीकरणापकर्षे द्वादशाहापेक्षया प्रागुक्तनवममासा-दिगौणकालपरिग्रहः । अथ वा यथाकालमित्यादेर्यदङ्गं वृद्धिरापद्यतेत्यनेनावश्यकनामकरणादिवृद्धयर्थमेवापकर्षो न त्वनावश्यकेष्टपूर्त्ताद्यर्थापकर्षः कार्य्य इति तात्पर्य्यम् । अतएव लघुहारीतेन "तथैव कार्य्यं यत् कर्म वत्सरात् प्रथमादृते" इत्यनेन काम्यस्यापकर्षनिमित्तता नास्तीत्युक्तम् । यदि त्वावश्यकवृद्धिनिमित्तेनापकर्षः कृतस्तदा इष्टापूर्त्तादि काम्यं वत्सरात्परेऽपि कर्त्तव्यमिति श्राद्धविवेकोऽप्येवं यद्यपि गोभिलसूत्रादौ सपिण्डीकरणस्यैवापकर्षः प्रागुक्त-स्तथापि सपिण्डीकरणापकर्षे तत्पूर्वकर्त्तव्यश्राद्धानामपि तदादितदन्तन्यायादपकर्षः । "सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः" इति शातातपवचने प्रेतक्रियायाः सपिण्डीकरणान्तत्वं प्रतीयते । अत्र वृद्धिनिमित्तं विना सपिण्डनापकर्षे कृते पूर्णसंवत्सरकालं प्राप्य प्रेतत्वपरी-हारमाह विष्णुधर्मोत्तरम् "कृते सपिण्डीकरणे नरः संवत्सरात् परम् । प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" वृद्धिनिमित्तकसपिण्डीकरणापकर्षे कृते तत्क्षणादेव प्रेतत्वपरीहारः तदर्थमेवापकर्षात् एवञ्चान्यनिमित्ताप-कर्षे वृद्धिकालं प्राप्य प्रेतत्वपरीहारः तत्कालस्य पूर्ण-संवत्सरकालतुल्यत्वात् । "अर्व्वाक् संवत्सरात् वृद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषान्तु पृथक्क्रिया" इति शातातपवचनात्" ।

**सपिण्डीकृत** त्रि० सह पिण्डैः पित्रादिपिण्डैः सपिण्डः ततः च्विर्-कर्मणि क्त । यदुद्देशेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् कृते जने "ये सपिण्डीकृताः प्रेताः" इति शाता० स्मृतिः । [घोषातकीवृक्षे राजनि० ।

**सपीतक** पु० सह समानः पीतकेन सदृक्षः सः । राज-

**सपीति** स्त्री पा-क्तिन् पीतिः पानम् सह एकत्र पीतिः । ज्ञात्यादीनां सह भोजने शब्दर० । [तकोवृक्षे राजनि० ।

**सपीतिका** स्त्री सह पीतेन कप् अत इत्वम् । हस्तिघोषा-

**सप्तक** न० सप्तानामवयवम् कन् । १सप्तसङ्ख्यायाम् । सप्त प्र-

मायमस्य कन् । २सप्तसङ्ख्यान्विते त्रि० । पूरणे कन् । ३सप्तानां पूरणे च । [खलायाम् अमरः ।

**सप्तकी** स्त्री सप्तभिः स्वरैरिव कायति शब्दायते कै-क । मे-

**सप्तचत्वारिंशत्** स्त्री सप्ताधिका चत्वारिंशत् शाक० । (सातचल्लिश) १सङ्ख्यायां २तत्संख्यान्विते च । एवं सप्तद-शादयः सप्ताधिकतत्तत्संख्यायां तत्संख्यान्विते च । पूरणे डट् । सप्तचत्वारिंश तत्तत्संख्यापूरणे त्रि० स्त्रियां ङीप् एवं सप्तदशादयोऽपि तत्पूरणे एवं तमप् सप्तचत्वारिं-शत्तम तत्पूरणे त्रि० स्त्रियां टाप् ।

**सप्तच्छद** पु० सप्त सप्त छदाः प्रतिपर्व्वम् यस्य इत्तौ संख्या-शब्दस्य वीप्सार्थता भाष्योक्ता । (छातिम) वृक्षे राजनि० ।

**सप्तजिह्व** पु० सप्त जिह्वा इव आस्वादसाधनानि अर्च्चिषो यस्य । वह्नौ त्रिका० । "काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा । उग्रा प्रदीप्ता च कृपीट-योनेः सप्तैव लोलाः कथिताश्च जिह्वाः" इत्युक्तानां सप्ता-नामग्निज्वालानामेव तज्जिह्वात्वमुक्तम् । वह्निजिह्वानां वर्णभेदः अवस्थानदिग्भेदश्च गणेशविमर्षिण्यां दर्शितो यथा "हिरण्या तप्तहेमाभा स्थूलपार्श्वे दिशि स्थिता । वैदूर्य्यवर्णा कनका प्राच्यां दिशि समाश्रिता । तरुणा-दित्यसङ्काशा रक्ता जिह्वाग्निसंस्थिता । कृष्णा नीलाभ्र-सङ्काशा नैर्ऋत्यां दिशि संस्थिता । अतिरक्ता जवा-भासा वायव्यां दिशि संस्थिता । बहुरूपा तथा ख्याता दक्षिणोत्तरसंस्थिता" ।

**सप्तज्वाल** पु० सप्त काल्यादयः ज्वाला यस्य । १वह्नौ हेमच० । २सप्तार्च्चिरादयोऽप्यत्र अमरः । [यज्ञे अमरः ।

**सप्ततन्तु** सप्तभिः भूरादिभिर्व्याहृतिभिस्तन्यते तन्-तुन् ।

**सप्तति** स्त्री सप्तगुणिता दशतिः नि० । (सत्तर) १संख्यायां २तत्संख्यान्विते च । ततःपूरणे डट् । सप्तत तत्संख्यापू-रणे त्रि० स्त्रियां ङीप् ।

**सप्ततितम** त्रि० सप्ततेः पूरणः तमप् । येन सप्ततिसंख्या पूर्य्यते तस्मिन् अर्थे स्त्रियां टाप् ।

**सप्तद्वीपा** स्त्री सप्त जम्बूप्रभृतयो द्वीपाः यस्याः । जम्बूप्रभृ-तिसप्तद्वीपयुतायां पृथिव्याम् । जम्बूद्वीपशब्दे ३०४३पृ० दृश्यम्

**सप्तधा** अव्य० सप्तन्+प्रकारे धाच् । सप्तप्रकारे ।

**सप्तधातु** पु० ब०व० सप्तगुणिता धातवः । देहस्थेषु "रसाश्च मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्था इमे ज्ञेयाः पण्डितैः सप्त धातवः" इत्युक्तेषु रसादिषु धातुषु राजनि० ।